नं. ४३०२ क
नवगोरहेत्व सी विवाल
३५ सत्ताग्गी

नं. ५८

#5763
F-34

Complete

Jhelum

शा॰ चं॰ १

ॐ स्वस्ति श्रीगणेशाय नमः अथो नवार्णं मंत्रं वक्ष्ये चंडी प्र
सिद्धये वाग्भवाया मदनो दीर्घो लक्ष्मी लं ह्रीं श्रुतीड युक्त ङायै
मह रग्जलं कूर्म हयं किं ठी शसंयुतं नमोंतः शांतिके पुष्टौ प्र
णिपाते प्रणीयते वश्याकर्षण मोहेन स्वाहांतः सिद्धिदायकः
वौषट्पल्लवं संयुक्तो मंत्रः पुष्टादि साधकः हुंकार युक्तो मंत्रो
यं मारणे ग्रासनं विना यंत्र भंजन काले स्रस्रोर भयनाशने
वषडंतः सदा कार्यो ग्रहमाला विनाशने षंडनोच्चाटने वंध्ये मंत्रः

फट्पल्लवान्वितः ॐकारमुखोमंत्रोवेदागमसमुद्भवः नाभि
मात्रेजलेस्थित्वाजपेन्मंत्रंनवाक्षरं नर्पयेच्चंडिकांनोयैर्नित्यंस
हस्रसंख्यया मूकःसुप्तोमृतोनग्नोविधिहीनोहृष्यात्तथा भुजंगः
कीलितःसुप्तर्ह्टश्चमंत्रोन्यथाफलं न्यासंविनाभवेन्मूकःसुप्तः
स्यादासनंविना पल्लवेनविनामंत्रोनग्नःसंपरिकीर्तितः शिरो
हीनोमृतःप्रोक्तोयथामंत्रोगुरुंविना हतोऽदृष्टायदन्योयोनिवी
यस्माधिकाक्षरः अहितानिचबीजानिव्यामःकीलितउच्यते अ

प्रा॰ चं॰ २

2

षिद्धंद्वोदेवताभिःपरित्यक्तोभुज्जगमः अथजपचंडीविधिः
मार्कंडेयपुराणे राजोवाच श्रुतंमयापरिपृच्छामिचंडिकापूजनं
शुभं नित्यंचउग्रादिजाप्यस्यविधानंचद्विजोत्तम ऋषिरुवाच
परिपृच्छसियत्नेनचंडिकापूजनंचयत् तदहंतेप्रवक्ष्यामिय।
थावदनुपूर्वशः त्रैलोक्यडामरंमंत्रंमहाएउभुवनवात्तरं यस्यवि
ज्ञानमात्रेणपरमैश्वर्यवान्नरः ऐंवीजमादौइसमानयुक्तंह्रींस्त
यंतेजोद्युतिमहितीयं क्लीमत्रवैश्यानरत्नरूपरूपंत्वतीयमानं

त्यसुख्यायचितं चोष्ठं जांबूनदतुल्यकांतिं मंत्रे पंचमं रक्तवर्णं
प्रदिष्टं उग्रं षष्ठमुग्रार्तिहारं सुनीलं येसप्तमं कृष्णतरं रिपुघ्नं
विपांडुरं चाष्टममादिसिद्धं स्वेष्णवर्णं नवमं विशालं एतानि
बीजानि नवात्मकस्य जपे त्वदद्युः सकलार्थसिद्धिं नववीजनि
वद्धोयं मंत्रस्ते लोकाद्यमरः एवं प्रजपते मंत्री फलं तस्य वदाम्य
हं वशगा भवंति कामिन्यो राजानो नुचरा इव नष्टे श्रीमर्पदा वा
ग्निचौरशत्रुभयं भवेत् सर्वाः समृद्धयस्तस्य जायंते चंडिकाप्र

श्रा. चं. ३

3

या नश्यंति दारुणा रोगाः सत्यं सत्यं न संशयः सहस्रमस्य मं
त्रस्य यो जले निर्मले शुभे नाभिमात्रे जपेत्सम्यक्सकरितं बल
मेद्भुवं अयुतं नववीजस्य रानाम हति संकटे जपेदाशु वि
मुच्येत यो मंत्री चंडिकाज्ञया अस्मिन्नवाक्षरे मंत्रे महालक्ष्मी
र्व्यवस्थिता तस्मात्ससिद्धः सर्वेषां सर्वदिक्षु प्रदीपकः अथ
न्यासादौ विधिवत्स्नात्वा ऋष्यादिकरषडंगन्यासं कृत्वा प्रति
वीजांते चंडिकात्त्रपतामिति चंडिकां तर्पयेत् शतेन तदर्धं वा

ततः पुष्पप्रकरशोभाढ्यं वितानध्वजसेवितं इत्यादिलक्षणो
पेतं पूजागृहमागत्य द्वारदेवताः संपूज्य विघ्नानुत्सार्य्यासनं
परिकल्प्य तत्रोपविश्य भूतशुद्धिपूर्वकं मातृकान्यासंकुर्या
प्रथमोमातृकान्यासःकार्यःसर्वोक्तमार्गतः कृतेनयेनदेव
स्यसारूप्यंयातिमानवः अथद्वितीयंकुर्वीतन्यासंसंहारस्त्वना
भिधं आद्यंबीजत्रयंध्यानंप्रणवादिनमोन्तिकं कनिष्ठादिषु
सर्वेषुपंचस्वंगुलिषुन्यसेत् करमध्येचतत्पृष्ठेतथैवमणि

शा. वंयके हृदिमूर्ध्निशिखायांचकवचेचर्नेत्रेरंसयोः वंयेश्रुसं
च. स्त्रोमकवंसर्वदिक्षु पृथकपृथक् कृतेसारस्वतेन्यासे विल
८ यंयांतिपातकं ततःस्वतीयंकुर्वीतन्यासंमातृगणान्वितं
५ मध्येमीनादिकाब्राह्मीपूर्वतःपातुसर्वदा माहेश्वरीतथाग्ने
यांकौमारीदक्षिणेवतु वैष्णवीपातुनैरृत्यांवाराहीपश्चिमे
वतु इंद्राणीपावनेकोणेचामुंडाचोत्तरेवतु ईशानेतुमहाल।
क्ष्मीरूर्ध्वंव्योमेश्वरीतथा सप्तद्वीपेश्वरीभूमौरक्षेन्नागेश्वरीत।

ले तृतीयेस्मिन्कृतेन्यासेत्रैलोक्यविजयीभवेत् न्यासंचतु
र्थंकुर्वीतनंदजादिसमन्वितं नंदजापातुसर्वांगंकमला
कुशमंडिता खड्गपात्रकरःपातुदक्षिणेरक्तदंतिका पृष्ठेशा
कंभरीपातुपुष्पपल्लवसंयुता धनुर्बाणकरापातुवामेदुर्गा
सदैवमां शिरःपातुकराभीमामलकाञ्चरणावधि सर्वदा।
भ्रांशिरोयावद्भ्रामरीचित्रकांतिभृत् तुर्यन्यासंनरःकुर्वन्रुज
ाम्स्तंव्यपोहति अथकुर्वीतब्रह्माद्यं न्यासंपंचममुत्तमं

शा॰ पादाभ्यांनाभिपर्यंतंब्रह्मापातुसनातनः नाभेर्विशुद्धिपर्यंतं
च॰ पातुनित्यंजनार्दनः विशुद्धेर्ब्रह्मरंध्रांतंपातुरुद्रस्त्रिलोचनः
५ हंसःपातुपदद्वंद्वंवैनतेयःकरद्वयं चक्षुषीवृषभःपातुस
5 र्वांगाणिगजाननः परात्परतरःपातुसर्वानंदमयोहरिः इ
तिमन्त्रंन्यासेसर्वान्कामानवाप्नुयात् षडंगन्यासंततःकुर्या
न्महालक्ष्म्यादिसंयुतं मध्येपातुमहालक्ष्मीरष्टादशभुजाभुवं
ऊर्ध्वंसरस्वतीपातुभुजैरष्टाभिरूर्जिता अधःपातुमहाकाली

त्रिंशल्लोचनमंडिता सिंहोहृत्हृदयेपातुपरमहंसोहिमंड
लं मह्हिवंदिव्यमातृकोयमःपातुपदद्वयं महेशश्चंडिका।
युक्तः सर्वांगानिममावतु षष्ठेस्मिन्विहितेन्यासे सकृतिप्रा
प्नुयान्नरः मूलाद्वारन्यासएवंन्यासं ऊंवीतसम नं स्तरंध्रे
नेत्रयुगमेश्रुत्योर्नासिकयोर्मुखे पायौमूलमनोर्वर्णानाम
ष्टानमसाविताने विन्यसेत्सममेमासेकृतेरोगक्षयोभवेत्
पायुतोब्रह्मरंध्रांतपुनस्तानेवविन्यसेत् कृतेऽस्मिन्नष्टमे

प्रा॰ चं॰ ९

6

न्यासे सर्वदुःखं विनश्यति कुर्वीत नवमं न्यासं मंत्रव्याप्तिस्व
रूपकं मस्तकाच्चरणं यावच्चरणान्मस्तकावधि पुरोदक्षे पृ
ष्ठदेशे वामभागेष्टमे न्यसेत् मूलमंत्रकृतो न्यासो नवमो देव
तात्मिकृत् ततः कुर्वीत दशमं षडंगन्यासमुत्तमं मूलमंत्रजा
तियुक्तं हृदयादिषु विन्यसेत् कृतेस्मिन्दशमे न्यासे त्रैलोक्यं।
वशगं भवेत् दशन्यासप्रविष्टो यो यद्देवस्तथा भवेत् चंडी
सप्तशतीमाप्य सरहस्येन्द्रपोन्नमन्यासं ते संप्रवक्ष्यामि ब्रह्म

विद्यशिवोदितं खड्गिनीशूलिनी श्लोकमाद्यंकृत्स्नतरंन्यसे
त् मूलेनयाह्निनोदेविपुनःश्लोकचतुष्टयं बालार्कसदृशा
न्यासंचिंतनीयंमहत्तरं इतिशिरसिन्यसेत् सर्वस्वरूपेत्या
दिश्लोकानांपंचकंपुनः शुद्धस्फटिकसंकाशंन्यासंत्रैलोक
कामदं इतिशिखायांन्यसेत् ततःषडंगंकुर्वीतविभक्तैर्मू
लवर्णकैः एकैनैकेनचैकेनचतुर्भिर्युगलेनच समस्ते
नचमंत्रेणकुर्यादंगानिषट्सुधीः शिखायांनेत्रयोःश्रुत्योर्न

श॰
चं॰ ८

सार्वजेगदेत्समेतत्‌ मंत्रवर्णान्समस्तेन व्यापकंतत्खशस्त्रेरेत्‌ न
तोऽङ्गन्यासादिन्यास: प्रथमचरित्रस्य ब्रह्माऋषिर्महाकालीदेव
ता गायत्रीछंद: नंदजाशक्ति: रक्तदंतिकाबीजं अग्निस्तत्वं
मध्यमचरित्रस्य विष्णुऋषिर्महालक्ष्मीर्देवता उष्णिकछंद:
शाकंभरीशक्ति: दुर्गाबीजं वायुस्तत्वं उत्तरचरित्रस्य रुद्रऋ
षिर्महासरस्वतीदेवता अनुष्टुछंद: भीमाशक्ति: भ्रामरीबी
जं सूर्यस्तत्वं सर्वार्थसिद्धयेजपेपाठेहोमेविनियोग: नवा

त्तारमंत्रस्य ब्रह्मविष्णुरुद्राऋषयः गायत्र्युष्णिगनुष्टुभःछं
दांसि महाकालीमहालक्ष्मीमहासरस्वत्योदेवताः नंदजा
शाकंभरीभीमाशक्तयः परमशिवलिंगंवीजं अग्निवायु
सूर्यास्तत्वानि अभीष्टफलप्राप्तयेविनियोगः ऋष्यादिन्या
संकृत्वा एकादशन्यासानिकुर्यात् तत्रादौमातृकान्यासः
अंनमः शिरसि आंनमोमुखवृत्ते इंनमोदक्षनेत्रे ईंनमोवाम
उंनमोदक्षकर्णे ऊंनमोवामे ऋंनमोदक्षनासायां ॠंनमोवामे

श्रा॰ ऌंनमो दक्षगंडे ॡंनमो वामे एंनमो ऊर्ध्वोष्ठे ऐंनमः अधरे ओं
वं॰ नमः ऊर्ध्वदंतपंक्तौ औंनमः अधोदंतपंक्तौ अंनमो मूर्ध्नि अः न
८ मः मुखे कंनमो दक्षबाहुमूले खंनमः कूर्परे गंनमो मणिबंधे
४ घंनमः अंगुलिमूले ङंनमः अंगुल्यग्रे चंनमः वामबाहुमूले
छंनमः कूर्परे जंनमः मणिबंधे झंनमः अंगुलिमूले ञंनमः अं
गुल्यग्रे टंनमो दक्षपादमूले ठंनमो जानुनि डंनमो गुल्फे ढंन।
मोंगुलिमूले णंनमोंगुल्यग्रे तंनमो वामपादमूले थंनमो जा

ज्जानि दं नमो गुल्फे यं नमो ऽंगुलिमूले नं नमो ऽंगुल्यग्रे पं नमो
दक्षजङ्घा फं नमो वाम वं नमः पृष्ठे भं नमो नाभौ यं नमः उदरे
यं नमो हृदि रं नमो दक्षस्कंधे लं नमः ग्रीवायां वं नमो स्कंधे
शं नमो हृदयादिदक्षिणकराग्रपर्यंतं षं नमो हृदयादिवाम
कराग्रपर्यंतं सं नमो हृदादिदक्षपादाग्रपर्यंतं हं नमो हृदा
दिवामपादाग्रपर्यंतं लं नमः पादादिनाभ्यंतं क्षं नमो ब्रह्मरं
ध्रे इति प्रथमन्यासः अथ द्वितीयन्यासः ॐ ऐं ह्रीं क्लीं नमः

प्रा. कनिष्ठिकाभ्यांनमः ॐऐंह्रींक्लींअनामिकाभ्यांनमः ॐऐंह्रीं
चं. क्लींनमःमध्यमाभ्यांनमः ॐऐंह्रींक्लींनमःतर्जनीभ्यांनमः
१ ॐऐंह्रींक्लींनमःअंगुष्ठाभ्यांनमः ॐऐंह्रींक्लींनमःकरतल
करपृष्ठाभ्यांनमः एवंहृदयादिन्यासः एवंरश्म्यादिसर्व
दिक्षुपृथक्पृथक्कुर्यात् इतिसारस्वतन्यासंद्वितीयं २
अथपञ्चनीयः एवंह्रींब्राह्म्यैनमः आग्नेय्यां ह्रींमाहेश्वर्यैनमः
द. ह्रींकौमार्यैनमः नै. ह्रींवैष्णव्यैनमः प. ह्रींवाराह्यैनमः

९

वा॰ ह्रीं इन्द्राण्यै नमः ३॰ ह्रीं चामुण्डायै नमः ४॰ ह्रीं महालक्ष्म्यै
नमः ऊर्द्ध्वे ह्रीं व्योमेश्वर्यै नमः भूमौ ह्रीं सप्तद्वीपेश्वर्यै नमः
पाताले ह्रीं नागेश्वर्यै नमः इति तृतीयः ३ अथ चतुर्थः ४
पूर्वे नन्दजायै नमः कमलाङ्कुशमण्डितायै नमः द॰ खड्गपा
त्रकरायै रक्तदन्तिकायै नमः प॰ पुष्पपल्लवसंयुतायै शा
कम्भर्यै नमः वामे धनुर्बाणकरायै दुर्गायै नमः मस्तका
चरणावधि शिरःपात्रकरायै भीमायै नमः चरणाभ्यां शिर :

शा॰ चै॰ १॰

पर्यंतं चित्रकांतिभृद्रामयैनमः इतिचतुर्थः अथपंच
मः ५ पादादिनाभिपर्यंतं ब्रह्मणेनमः नाभ्यादिविशुद्धि
पर्यंतं जनार्दनायनमः विशुद्धाद्ब्रह्मरंध्रांतं त्रिलोचनाय
10 रुद्रायनमः पदद्वये हंसायनमः करद्वयेवैनतेयायन
मः चक्षुषोःवृषभायनमः सर्वांगानिजनार्दनायनमः परा
त्परायसर्वानंदमयायहरयेनमः इतिपंचमः अथषष्ठः
मध्येअष्टादशभुजायैमहालक्ष्म्यैनमः ऊर्ध्वअष्टभुजायै।

सरस्वत्यैनमः अथः त्रिंशाल्लोचनमंडितायैमहाकाल्यैन
मः हृत्कमलहृदये सिंहायनमः अग्निमंडलेपरमहंसायनमः
पदद्वंद्वे दिव्यमहिमारूपाययमानमः सर्वांगानिचंद्रिका
युक्तायमहेशायनमः इतिषष्ठः अथसप्तमः ऐंनमः ब्रह्म
रंध्रे ह्रींनमः चक्षुषोः क्लींनमः कर्णयोः चामुंडायैनमः ना
सिकायां विंनमः मुखे च्चेंनमः पादयोः इतिसप्तमः अथा
ष्टमः च्चेंनमः ब्रह्मरंध्रे विंनमः मुखे चामुंडायैनमः नासिका

शा० च० ११ यां ह्रींनमःकर्णयोः ह्रींनमःचक्षुषोः ऐंनमः ब्रह्मरंध्रे इ
त्यष्टमः अथनवमः मूलंशिरआदिपादपर्यंतं मूलंपादा
दिशिरःपर्यंतं मू० पूर्वे मू० दक्षिणे मू० पृष्ठे मू० वामे इतिनव
११ मे अथदशमः मूलंअंगुष्ठाभ्यांनमः एवंकरषडंगन्यासःकृ
ता इतिदशमः एकादशकरणाशक्तावेकमेवकुर्यात् न
द्यथा एवंकृतोमूलिनीजोरेतिश्लोकंकृत्स्नतंन्यसेत् मूले
नयाहिनोदेवि प्राच्यांरक्षप्रतीच्यांच सौम्यानियानिरूपाणि

खड्गशूलगदादीनि श्लोकचतुष्टयं बालादित्यसन्निभे शि
रसि न्यसेत् सर्वस्वरूपे पतन्नेवदनं ज्वालाकराल अमन
क इति श्लोकपंचकं स्फटिककांतं शिखायां न्यसेत् ऐं अंगु
ष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां स्वाहा क्लीं मध्यमाभ्यां वषट् श्री
मुंडायै अनामिकाभ्यां हुं विच्चे कनिष्ठिकाभ्यां वौषट् मूलं
करतलकरपृष्ठाभ्यां फट् एवं षडंगः ऐं ह्रीं क्लीं चामुंडायै वि
च्चे ऐं नमः शिखायां ह्रीं नमः दक्षनेत्रे क्लीं नमः वामनेत्रे चा

श्या॰ नमःदक्षकर्णे मेंनमःवामे ॐनमःदक्षनासायां येनमः
चं॰ वामे विंनमःमुखे च्चेंनमःगुह्ये एवमष्टवारंमूलेनव्यापं
१२ कुर्यात् एवंन्यासविधिंकृत्वा ततोध्यानं ॐखड्गंचक्रगदे
12 षुचापपरिघांशूलंभुशुंडींशिरःशंखंसंदधतींकरैस्त्रिनय
नांसर्वांगभूषावृतां योहंतुंमधुकैटभौजलजभूःस्तुष्टाव
सुप्तेहरौ नीलाश्मद्युतिमास्यपाददशकांसेवेमहाकालि
कां १ अक्षस्रक्परशुंगदेषुकुलिशंपद्मंधनुःकुंडिकां दंडं

शक्तिमसिंचचर्मजलजंघंटांसुराभाजनं शूलंपाशसुद।
र्शनेचदधतींहस्तैः प्रवालप्रभां सेवेसैरिभमर्दिनीमिह
महालक्ष्मीसरोजस्थितां २ घंटाशूलहलानिशंखमुसले
चक्रंधनुःसायकां हस्ताब्जैर्दधतींघनांतविलसच्छीतांशु
तुल्यप्रभां गौरीदेहसमुद्भवांत्रिजगतामाधारभूतांमहा पू
र्वामत्रसरस्वतीमनुभजेशुंभादिदैत्यार्दिनीम् एवंप्रकारेण
ध्यात्वा दृष्टिमुद्रांविलोकयेत् ततोर्घ्यंयथाविधिसंस्थाप्य

शा॰ साष्टदलषट्कोणेनचक्रमध्यबीजव्यवस्थितां एवंको
चं॰ णेविधातारंसत्पासहस्रप्रपूजयेत् विष्णुश्रियाचैनैन्द्रत्वे।
१३ वायव्यांतुमहाशिवं उदक्दक्षिणयोः सिंहंमहिषंचक्रमा
घजेन्न अष्टादशभुजांध्यात्वामहालक्ष्मींप्रणम्यच पीठादि
13 पूजनंकुर्यात्स्वबीजेनपृथक्पृथक् ॐकारःप्रथमंपीठंपूर्णं।
पीठमतःपरं तत्परंकामपीठंचपूजयेत्संप्रदायतः एवंदि
दिक्षुपीठस्यगणेशादिचतुष्टयं गणेशक्षेत्रपालौचपादुके

वटुकस्तथः आग्नेयादिचतुर्दिक्षु पूज्यं देवीचतुष्टयं जयाचै
वाजयाचैव जयंती चापराजिता प्रणवादिचतुर्थीचनमोंता
श्च पूजयेत् प्रागादिक्रमयोगेन पंचषट्चषडंत्र्च विष्णु
मायाचेतनाच बुद्धिर्निद्राक्षुधा तथा छायातृष्णापरा शक्तिः
क्षांतिर्जातिश्च लज्जया शांतिः श्रद्धा कीर्तिलक्ष्मीधृतिर्वृत्तिः श्रु
तिः स्मृतिः दयापुष्टिस्तथातुष्टिर्माता भ्रांतिरितिक्रमात् ताल
मूलेततः पूज्यमाधारादिचतुष्टयं आधारः कूर्मशेषौचनालं।

शा. पश्चिमे च यजेत् ततोर्च्याङ्गिरस्यासिच्यमंडले सोम्यदृष्टिवान्
च. पूर्वादिपत्रतः पूज्यं मातॄणां मंडले शुभे ब्रह्माणीं हंसमारूढां
१४ माहेश्वरीं वृषसंस्थितां दंष्ट्रोद्धृतधरां यज्ञवाराहीं पूजयेत्तथा
14 श्रियं सनां नारसिंहीं ऐन्द्रीं च गजसंस्थितां गणनाथपरीवारां।
महारुद्रेण संयुतां ईशपत्रे समभ्यर्च्य चामुण्डां मुण्डमंडितां षट्।
कोणेषु च पूर्वादि नंदजा रक्तदंतिका शाकंभरी तथा दुर्गा भी
मां वध्यामरीं यजेत् नंदजा हेमगर्भाभा स्वरका रक्तदंतिका

नीलाष्टाकं भरीदुर्गा सर्वदुर्गार्तिहारिणी देष्ट्राचिंतमुखी
भीमानीलपत्रशिरोयरा तेजोमंडलदुर्धर्षाभ्रामरीवरदा
र्चिता आद्यवीजे महाकालीध्यानएवंसमर्चयेत् तृतीये
दुर्भुजांध्यात्वासमभ्यर्च्यसरस्वंती मध्यवीजे विरंध्यात्वामहा
लक्ष्मीप्रपूजयेत् आह्वानएवंकंदद्यादासनंमणिभूषितं
एकाकारंमहालक्ष्म्यारूपंध्यात्वापरावरं मुद्राभुजाद्यथाकारा
वेदिकायैप्रदर्शयेत् ततःपाद्यार्घ्याचमनमधुपर्कस्नान

शा. चमनस्नानवस्त्राभरणगंधपुष्पधूपदीपनैवेद्यसकर्पूर
चं. तांबूलानिसमर्प्य भूयः प्रणम्यसरहस्यांसप्तशतीचंडी
१५ पठेत् प्रथमंचरित्रंविद्धिमधुकैटभनाशनं महिषासु
15 रनिर्णाशंचरित्रंविद्धिमध्यमं चरित्रंचोत्तरंज्ञेयंनिशुंभा
दिवधान्वितं अनेनजपदशांशेनपायसतिलसर्पिषा नवा
होरात्रमंत्रेणस्मार्त्तेग्नौविधिपूर्वकं उपकृतःप्रोक्षितोमंत्रैः
पावनी[illegible] समुज्ज्वलः संस्कृतायांभविष्याप्यस्मार्त्तेग्नौसं।

प्रकीर्तितः नमो देव्या इत्यनेन श्लोकेन जुहुयाद्धविः सज
पं होममावेद्य महालक्ष्मीं प्रणम्य च मूलेन पाहि नो देवी त्य
तैः श्लोकैः प्रदक्षिणं विदध्यात्सुस्थिरो भूत्वा चंडिकाध्यानत
त्परः नमो देव्या इति श्लोकैः पंचभिः प्रणमेत्तथा कृत्वा पंच
नमस्कारानुपविश्यासने शुभे सर्वस्वरूपे इत्यादि षड्भिः श्लो
कैः कृतांजलिः प्रार्थयेज्जगतां धात्रीं प्रणतात्मा हृदि स्थितां
स्वशरीरे समारोप्य दद्यात्तस्यै विसर्जनं अनेन विधिना नित्यं।

श्री. चं. १६

16

यःकुर्याच्चंडिकार्चनं तस्यतुष्टामहालक्ष्मीर्दद्यादैश्वर्यमु
त्तमं तंकरोतिमहालक्ष्मीर्ब्रह्मविष्णुशिवोपमं धर्मार्थका
ममोक्षाणांत्रिषुलोकेषुभाजनं अनेनसदृशंनास्तिसमं
समंवदाम्यहं एवोक्तविधिनाकृत्वाचंडिकातर्पणादिकं
इतिपूजाविधिः शुक्लभूतामवष्टभ्यमासंप्रतिदिनेयजेत्
सकृद्द्रह्मस्संयुक्तंचंडिकाचरितत्रयं दशांशहोमसहितं
सोच्यतेनित्यचंडिका धनपुत्रयशोदात्रीमहाव्याधिविनाशिनी

महाभयमहाड: खहंश्रीसौभाग्यदायिनी शुक्लाष्टमीमवष्ट
भयावकृष्णचतुर्दशी नवदुर्गाविधातव्यासर्वयत्नफलार्थिना
सर्वैश्वर्यप्रदाश्रपकरुतामवलंबिता शरद्दताविषमासे शुक्ल
पक्षन्यपोतम प्रतिपत्तिथिमारभ्यनवचंडीसमाचरेत् तोरणो
द्वेपुष्पेध्याने स्वविताने स्वलंकृते पूर्वादिक्रमयोगेनदिग्देवीभ्यो
वलिंहरेत् गंधपुष्पाक्षतैर्धूपैर्दीपैः पुष्पकरुभिरुत्तमैः कादंवरीगजा
रूपापनरास्याजतुष्टगा करालीमहिषारूपाकालीप्रेतसंस्थिता

पा० च० १७

17

श्वेतकुंभीरगाश्वेताहरितान्मृगवाहना हंसएष्ठेसरस्रेष्टास
[illegible]नाहिवाहिनी अनेनविधिनादत्वादिग्देवीभ्योवलिंतथा
नवग्रहाल्लोकपालान्दिशःपालान्प्रपूजयेत् कलशंसर्वर
त्नाढ[illegible]मवस्रोदकान्वितं संप्रतिष्ठाप्यसंपूज्यचंडिकार्चन
मारभेत् एवंविधेनविधानेनगंधपुष्पैरनुत्तमैः वस्त्रालंकारक
र्पूरैमिहस्रागुरुकुंकुमैः धूपैर्दीपैर्वकुविधैर्नैवेद्यैर्वर्णसंख्य
या कृत्वान्यासंर्वंवत्सर्वंजपेदेकाग्रमानसः सकृद्दहस्रसंयुक्तं

चंडिकाचरितत्रयं कुमारीविप्रसुवासिभोजयेद्दितिपूर्वकं
पदाद्येदिवसेकुर्याच्चंडिकापूजनादिकं द्विगुणंतद्दितीयेहि
त्रिगुणंतत्परेहनि नवमीतिथिपर्यंतंदुर्गापूजाजपादिकं
एकाहारंव्रतीकुर्यात्सत्यादिनियमैर्युतः कृत्वाहोमादिकंकार्यं
नवदुर्गाविधानतः विनष्टाष्टपरिमंडकुर्यादाचार्यपूजनं
वस्त्रांगुलीयकंधेनुंवाजिहेमप्रदानतः अशक्तौनिष्कमेकंतु
देयमस्मैप्रयत्नतः विद्यातिविधानेनयपूर्णानवचंडिकाम्

श्रा. चं. १८ इंद्रब्रह्मादयोदेवास्तमायांतिग्रमेवितं अपुत्रोलभतेपुत्रा
न्नधनःसधनोभवेत् नतस्यास्तिभयंकिंचिद्राजचौराग्निवा
रिजं ऋषिरुवाच शांतचंडीविधानंतुयथावत्कथयाम्यहं
18 म्लेच्छोत्थायामनावृष्ट्यांभूकंपेचसदारुणे परचक्रभयेतीव्रेत्त
यरोगउपस्थिते महोत्पातेननाशायपंचविंशतियोजने सर्वे
विघ्नाविनश्यंतिशांतचंडीविधौकृते रोगाणांवैरिणांनाशाय य
नपुत्रसमृद्धयः शिवाभ्यासेसमेदेशे चतुर्द्वारंसतोरणं पताका

लंकृतेकार्यात्मंडपंवेदभूषिते तत्रकुंडंप्रकर्तव्यंशुभंलक्ष
णसंयुतं स्नात्वानित्यकृतिंकृत्वावृणुयाद्दशवाडवान् जि
तेंद्रियान्सदाचारान्कुलीनान्सत्यवादिनः श्रुतवंतांश्चंडिकापाठ
रतांल्लज्जादयावतः ईदृक्लक्षणसंयुक्तान्दंभमोहविवर्जितान्
दशविप्रान्समभ्यर्च्यमहालक्ष्मीस्वरूपिणः मधुपर्कविधानेन।
स्वर्णवस्त्रविभूषणैः जपार्थमासनंमालांदद्यात्तेभ्योपिभोजनं
तेहविष्यान्नमश्नंतोमंत्रार्थगतमानसः भूमौशायानाःप्रत्येकं।

प्रा॰ चै॰ १९ 19

जपेयुर्मुण्डिकास्तं पाद्यादिभिस्तथाभ्यर्च्य वृणुयातान्व्रय
त्नतः ... र्यं वृणुयाद्गन्धादयाहिरण्यप्रजनं अर्चितास्ते
हिगमप्रेष्टाय यजमानं सर्वांथवं कलशाग्रेउपावेशयप्रकुर्युः स्व
स्तिवाचनं यजमानस्ततो विप्रैर्गीतवादित्रनिःस्वनैः चंडि
कामंडपं यायात्परिवारसमन्वितः पश्चिमद्वारमार्गेण प्रविश्य
कलशमंडपं देशिकः सर्वमंत्रज्ञो नवभिर्ब्राह्मणैः सह दिग्देवीन
वग्रहांलोकपालांश्च संपूज्य कलशं संस्थाप्य मंडपस्य चतुर्दि

न्दत्वा भूतवलिंवहिः मंडपेकलशौद्वौद्वौद्वारि[illegible]रिनिवे
शयेत् सगंधोदकसंपूर्णांवाम्रपल्लवशोभिनौ धूपदीपपास
नैवेद्यांवहणमासनोदकं प्राणायामविशुद्धात्मादौरक्षोत्मा
सभूषितः चंडिकापूजनंकुर्यात्सर्वैर्वस्त्रविशेषतः पलद्वयं
तसंपूर्णं मन्त्रलेपनमाहरेत् दिव्यवस्त्रमलंकारंकस्तूरीकुं
कुमंतथा लक्षपुष्पचतुर्थांशं गुग्गुलस्यपलद्वयं दीपानांविं
शतिःप्रोक्तं मंडपेजपमारायनं कुंडवौहोहविष्यान्ने नैवेद्यं।

दु० सरसंयुक्तं तांबूलानां सकर्पूरं शतद्वयमनुत्तमं नवभिश्री
चं० ल्लैरोः सार्द्धं कृत्वा एज्ञो हि जोत्तमः ददाति नवविप्रेभ्यो नवसं
२० ख्यानधुरः सरं तेष्वनुज्ञामयावेद्य विद्यामाचार्यसन्निधौ स्व
20 स्वासनेषु संतुष्टा उपविश्य स्वनिश्चलाः न्यासध्यानसमायु
क्ताश्चंडिकाचरितत्रयं सरहस्यमष्टषष्ठं देवताशक्तिसंयुतं
बीजतत्त्वसमायुक्तमुपांशुगणसंयुतं जपेयुस्त्रपमेकैकं मो
निनस्त्यक्तमत्सराः समस्त्याय ततः कुर्युः देव्यासर्वे प्रदक्षिणं

चंडिकां तु नमस्कारैः परितोष्य पुनः पुनः उपविश्यासने
स्वकैस्ततः सर्वार्थसिद्धिदैः प्रार्थयेत्तु प्रार्थफलं महाल
क्ष्मीर्दृढव्रताः कुमार्यो दश संभोज्या विप्रा दश तथोत्तमाः
महाकाल्या महालक्ष्म्याः सरस्वत्या व्रतं जपन् भोजयेत्पर
या भक्त्या देशिको हि दश द्विजान् ततो बंधुसमायुक्तो भुं
जीयाद्यज्ञकृत्तमान् ततः कथाभिः सुगीतैश्च सर्ववादित्रनिः
स्वनैः पूजनैर्ब्राह्मणीयैश्च वेदपाठैर्निशां नयेत् द्वितीये दि

शा. वसेत्स्नात्वाविधिवच्चद्विजादश चंडिकातर्पणंकुर्यात्सप्र
चं. णंध्यानपूर्वकं सर्वपृथकपृथक्कृत्वादिग्देवीपूजनादिकं
२१ बहिःभूतबलिंदत्वाकृत्वादेवीप्रदक्षिणं पूजागारेमहा
21 रम्येसंस्थमासनमास्थिताः जपेयुर्जपचंडीतियावद्दुर्गाप्र
पूजनं आचार्यःसुस्थिरःशांतःचंडिकायांप्रतोषणं कार्यश्च
जागरोरात्रौयुक्तःसर्वमहोत्सवैः एतत्सर्वंकृत्वातृतीयेह्निकर्त
व्यंविशुद्धेनतथा चतुर्गुणंचतुर्थेह्निपंचमेहोममाचरेत् पा

यंसंसर्पिषायुक्तंतिलैः शुक्लैर्विमिश्रितं जुहुयाद्रक्तवि।
ल्विनाद्शांशेनतर्पयेन्नम रुद्राध्यायेतथाहोमः मंत्रेणैकेन
साध्यते चंडीसप्तशतीजाप्येहोमेमंत्रेणवाहरः नमोदेव्यै
महादेव्यैशिवायैसततंनमः अथवायंभवेद्धोमेश्लोकःस्तु
तिनिरूपितः जपहोमेतुसंपूर्णेदिग्देवीनांशतंशतं होतव्यं
नाममंत्रैश्चहविष्यान्नेनसादरं ग्रहेभ्योवैदिकैर्मंत्रैःफलंपु
ष्पंशतंशतं दिव्यान्नेलोकपालानांहोमेसर्पिश्चरुस्तिलाः

श्री. आचार्यादिद्विजासर्वैजप्त्वास्तोत्रंशतंशतं होमेसंपूर्णतांनी
चं. तेनमस्कृत्याथचंडिकां स्तंभद्वयेस्कंधेकृत्वायजमानस्तत्र
२२ कृतैः स्तुतःॐभद्रशांतेनदद्यात्पूर्णाहुतिद्वयं मूर्धानमि।
22 तिमंत्रेणनवाक्षरमयेनवा चंडिकायैसमावेद्यततःस्वीयम
नोरथं ब्राह्मणेनिष्कषट्कान्नंदद्याद्गोमिथुनद्वयं दद्याद्गो।
मिथुनान्यष्टौआचार्यायसभक्तिमान् एकैकमष्टविप्रेभ्यो
दद्याद्गोमिथुनंसमं निष्कत्रयसमायुक्तंवस्त्रालंकारभूषितं

विप्राणांचतस्त्रंशाणांमहालक्ष्मीपरायणाः एकैकंश्लोका
मुच्चार्यदद्युराशिषमुत्तमं यजमानःसभार्यश्चलब्ध्वाशीर्वा
दंमंगलः रत्नपुष्पांजलीदद्याच्चंडिकायैविसर्जनं भूरिदा
नंततोदद्यात्पुण्यवादित्रनिःस्वनैः प्रविशेच्छांतिपाठैश्चतो
रणंस्वंस्वमालयं यद्यत्कार्यंसमुद्दिश्यक्रियतेशांतचंडिका
तत्तत्तस्यमहालक्ष्मीःसत्यमाशुप्रयच्छति शतमादौशतंवा
तेजपेन्मंत्रंनवाक्षरं चंडीसप्तशतीमध्येसंपुटोयमुदाहृतः

शा॰ सकामैः संपुटो जाप्यो निष्कामैः संपुटं विना पलक्षोप्यतंर
चं॰ तन्त्रं चंडिकाजपसिद्धिदं इति शतचंडीविधिः अथ होम
१२ विधिः संस्कारैरष्टभिः ॐ ड संस्कृत्याग्निं प्रवेशयेत् माया
23 बीजसमायुक्तैर्गोमयेनैतेः स्वमायकैः ॐ ड मध्यमुवंदभैः
परिमार्ज प्रलेपयेत् प्रागग्राः स्त्रुविभेरेखा त्रिस्ना लक्षम
लिखेत् पांसूनुद्धृत्य रेखाणामभ्युक्षणमतः परं ॐ ड स्.....
नं घटः समम: समसुद्दया अस्त्रावगुंठनं ॐ ड संस्कारस्माष्ट।

मः अष्टमंगलनामानंकुंडे ग्निं संप्रतिष्टयेत् चंडिकापाठ
संपूर्णं ब्राह्मणं दक्षिणेहिजं ततस्तदग्निमत्कुंडे नवसु
एवेष्टयेत् कुंडस्योत्तरतः स्थाप्यापात्रणीतावारिपूरिता प्रणी
तापात्रतोदक्ष उत्तरे वैश्वदेवताः स्थापयेत्प्रोक्षणी पात्रंप्रणी
तोदकपूरितं प्रणीतापात्रतः सर्वे स्थाप्यापात्रगणः क्रमात्
...स्याचरुस्थालीगव्यक्षीरसमन्विता स्रुक्स्रुवौ चरुणेनेड
ध्मं तंडुलाः कुशामूलिका पलाशसमिधस्तिस्रः पूर्णपात्रमतः

ग्रा. पं सप्तद्वीपेश्वरीं ध्यात्वा गृहीत्वा कुशमूलिकं निक्षिपेत्प्रो
चं. क्षणीपात्रे वारुणीवीजमुच्चरन् तेन द्रव्यसमूहेन संप्रोक्षे
२४ न च संस्थितं क्रमात्पात्रगणं प्रोक्षेत्प्रोक्षणीपात्रवारिणा
24 आज्यपात्रे चरुस्थाल्यां निक्षिपेद्धुततण्डुलं यथाक्रमेणाक
र्तव्यं ततोधिश्रवणं तयोः पर्यग्निकरणं कुर्यात्त्रिभिर्दर्भैः।
प्रसोज्ज्वलं स्रुवेग्रीतापनं कृत्वा प्रणीतोदकसेचनं पुनः
प्रतपनं कृत्वा दक्षिणे स्थापयेत्ततः उद्वास्य प्रथमं पूर्वोद्दानी

याग्नेप्रदक्षिणं ॐडाचार्योत्तरेष्ण्याण्या स्ववीजजपगौरवान्
अभियार्यस्वमार्गेणवायव्येष्यापयेत्रुं स्ववीजजपसंस्का
राद्देत्तस्तज्ञानयोर्भवेत् निष्टत्पलाशसमिधोमौनीवैश्यान
रेक्षिपेत् ॐपूमूलकयुक्ताभिः प्रोक्तएपङ्किः प्रदक्षिणं पर्यु
क्ताग्निप्रणीतायांनिक्षिपेत्कुशमूलकं निधायदक्षिणंजानुंश
भावग्निमुखंवेक्ष्हनेत् अन्वारब्धः स्रुवेणाज्यंनिरुमेहृत्यवाह
ने प्रजापतिर्महाकालीमहालक्ष्मीः सरस्वतीः पतद्दग्निमुखं

श्री॰ ओंक्रमायावीजपूर्वःसर्वं संस्तवात्प्रोक्तणीपात्रेनिक्षिपेद्य
चं॰ त्नमायनात् विदध्यात्कल्पितेहोममन्त्रकेननहविषाशमी ततः
२५ स्विष्टकृतंदद्याद्धविषासोज्वलेननले मायावीजब्रह्माणीमा
25 हेश्वरीकौमारीवैष्णवीनारसिंहीऐंद्रीचामुंडायैविच्चेस्विष्ट
कृतेस्वाहा एषप्रोक्तोमहाराजमंत्रःस्विष्टकृदाहुते प्राज्यस्य
नवकंदद्यान्मायावीजादिनामभिः नंदाचरक्तदंतिकाशाकं
भरीदुर्गाभीमाभ्रामरीकालिकाचैवशिवहनीप्रजापतिः

गंधपुष्पफलोपेतां कृत्वा यन्त्रात्मकां स्रुवं पूर्णाहुतिं ततो
दद्यात् घृतेनाछिन्नधारया नवाक्षरेण मन्त्रेण महालक्ष्मीप
रायणः ध्यात्वा यन्त्रे षोडशामन्त्रं तं देवं तु हीमं श्रीलक्ष्मीपाव
मध्यस्थान्मन्त्रेण प्राप्नोति संस्रवात् यस्माद्यन्त्रस्मात्स्तताद्य
ज्ञानो ब्रह्मरूपिणः तं संस्रवं षोडशांशं प्राशामि स्व पुण्यपदं
सलिलेन प्रणीतायास्तोत्र ध्यानपरायणः करोति मार्जनं दर्भ
[illegible]न श्लोकपाठतः अभिषिंचेदथात्मानं चतुर्भिश्छिडिकास्त

श्रा. वैः दानं दद्याद्विधानेन होमयेत्वं वरादिकं इति होमविधिः
च. अथ कुमारीपूजा सर्वयज्ञोत्तमं भूप कुमारीपूजनं स्मृतं
२६ कृते यस्मिन्महालक्ष्मीरचिरेण प्रमोदति कन्यालक्षणं प
26 कवर्षात्तु कन्यायाः पूजार्थे तां विवर्जयेत् गंधपुष्पफलादी
नां प्रीतिस्तस्य न विद्यते जात्यंधा केकराक्षी काणा कुरूपा तनुरो
मजा संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां अरोगि
सुपुष्टांगी सुरूपा व्रणवर्जिता एकवंशसमुद्भूता कन्या

मकन्पूजयेत् विघ्नासर्वेषुसंसिद्धौयशसेन्नत्रियोद्भवां
वैश्यात्तधनलाभायशूद्राभिष्टद्भजांयजेत् दारुणेचांत्यजा
तीनांपूजयेद्विधिनानरः द्विवर्षकन्यासारभ्यदशावर्षीयि
क्रमात् पूजयेत्सर्वकार्येषुयथाविधुक्रमार्गतः द्विवर्षा
साकुमार्युक्तात्रिमूर्तिर्हायनत्रिका चतुरब्दा कल्याणीपं
चवर्षातुरोहिणी षट्वर्षातुभवेत्कालीसप्तवर्षातुचंडि
का अष्टवर्षाशांभवीतुदुर्गास्यान्नवहायिनी सप्तमदशाव

श्रा. र्थाक्तानामभिः परिकीर्त्तिताः अतऊर्द्धंनपूजा दुःखदारि
चं. द्र्यनाशायशत्रूणांनाशायायच आयुष्यबलवृद्ध्यर्थंकुमारीं
२७ पूजयेन्नरः आयुःकामस्त्रिमूर्त्तीतुत्रिवर्गस्यफलाप्तये अप
27 मृत्युव्याधिपीडादुःखानामपनुत्तये सौख्यधान्यधनारोग्य
पुत्रपौत्रादि[illegible] कल्याणींपूजयेद्धीमान्नित्यंकल्याणवृद्
ये आरोग्यसुखकामीचजयकामीतथैवच यशःकामीनरो
नित्यंरोहिणींपरिपूजयेत् विद्यार्थीचजयार्थीचराज्यार्थीच

विशेषतः शत्रूणांचविनाशार्थंकालिकांपूजयेत्सदा ऐश्व
र्ययशकामीचस्वर्गकामीचयोनरः संग्रामेजयकांक्षीचचं
डिकांपरिपूजयेत् दुःखदारिद्र्यनाशायन्धपक्षमोहनायच
महापापविनाशायशांभवींपरिपूजयेत् नामेवयोक्तश
त्रूणामुग्रस्मायनकर्मणि दुर्गांदुर्गतिनाशायपूजयेद्यत्नतो
बुधः सौभाग्यधनधान्यादिवांछितार्थफलाप्तये समभद्रांपूज
येत्सर्वांदासींदाससमृद्धये अन्नपूर्णा ग्रामंजयेत्सर्वदिने

पू॰ कुमारीमंत्रस्सर्वकं आवाहयेत्ततःकन्यां मंत्रेणानेन भार्गव
चं॰ मंत्राक्षरमयीलक्ष्मीमातृणांरूपधारिणीं नवदुर्गात्मिकांसा
२८ क्षात्कन्यामावाहयाम्यहं कुमारिकादिकन्यानांपूजामंत्रंत्र्य
28 वेश्वना जगत्पूज्येजगद्वन्द्येसर्वशक्तिस्वरूपिणि पूजांगृहाण
कौमारिजगन्मातर्नमोस्तुते १ कलात्मिकांकलातीतांकरु
णाहृदयांशिवां कल्याणजननींनित्यांकल्याणींपूजयाम्यहं २
त्रिपुरांत्रिपुराधारांत्रिवर्गज्ञानरूपिणीं त्रैलोक्यवंदितांदेवीं।

त्रिमूर्तिं पूजयाम्यहं ३ अणिमादिगुणाधारां मकाराद्यक्ष
रात्मिकां अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहं ४
कामाचारां शुभां शांतां कालचक्रस्वरूपिणीं कामदां करु
णोदारां कालिकां पूजयाम्यहं ५ चंडवीरां चंडयागां चंडमुंड
प्रभंजनीं पूजयामि महादेवीं चंडिकां चंडविक्रमां ६ महानंद
करीं शांतां सर्वदेवनमस्कृतां सर्वभूतात्मिकां लक्ष्मीं शांभवीं
पूजयाम्यहं ७ दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीं सं

श्री॰ तोषजननींदेवींसुभद्रांपूजयाम्यहं ८ पूजयामिसदाभक्त्या
चं॰ दुर्गांदुर्गार्तिहारिणीं सुंदरींस्वर्णवर्णांगींसर्वसौभाग्यदा
२५ यिनीं संतोषजननींदेवींसुभद्रांपूजयाम्यहं ९ मंडलेचत्व
29 णौतसमन्तालयेत्कुसुमवारिणा अर्चयेद्धेमपात्रेणवारि[illegible]
न्नैः समं सुवितानेशुभेध्यानेपंकजोपरिपीठके उपवेश्य
कुमारींतांस्वांगन्यासंसमाचरेत् आत्मानंविधिवत्सम्यक्क्रोधद
र्पविवर्जितः अथध्यायेत्कुमारींतांमहालक्ष्मीस्वरूपिणीं मा

त्वं लंगं गदां खेटं पात्रं पीतं श्वेतं हरितं दत्त्वा यः करोद्धृतो।
विघ्नं नीसर्वमंगलो सततं प्रेमसर्वांगीमाघामाघसंस्।
र्जितो नवान्नेरेणमंत्रेण संमितेनसमर्चयेत् दद्यादा
...नास्यै दद्याद्धत्समकंचकं सकंकणांगुलीयानि कर्णा
लंकरणं शुभं ग्रैवेयकं प्रदत्त्वाथ चंदनेन विलेपयेत् स्रज
येत् छमालाभिर्दिव्यैः धूपैः संधूपयेत् ऊर्यादारात्रिकां राज
न्नुदयांवाचतोशुक्रः भोजयेद्भक्तिभावेन पायसं शर्करान्वितं

श्रा.
चं.
३.
30

सूपक्वान्नानि चान्यानि खाद्यरूपफलादिकं यावत्साभो
जनं कुर्यात्तावन्मौनं जपेत्सुधीः दद्यादाचमनं तस्यै तांबूलं
च समर्पयेत् अनेनैव विधानेन कुमारीं प्रणमेत्सकृत् प्रद
क्षिणानमस्कारान्कृत्वा मूर्ध्निकृतांजलिः विसर्जयेत्कुमारीं
तां स्वगृहे हर्षनिर्भरः अनेन विधिना भक्त्या कुमारीपूजयाप्नु
यात् यं यं प्रार्थयते कामं देवानामपि दुर्लभं ब्रह्मविष्णुमहेशा
नां कुमारीपूजयाकुलः तत्पूजनेन राजेंद्र त्रैलोक्यं स्यात्स्ववशे जि

तस्मात्सुजयभूपालकुमारीर्यतमानसः स्वर्गाङ्गप्राप्स्यसेस्ति

प्रेमातेभूदत्रसंशयः इतिकुमारीपूजा अथवलिप्रदानं तत्र

ऋषिछंदषडंगन्यासान्विधाय यथोक्तविधिनादेवींनिवेद्य

पशुस्नापयित्वा अग्रेणावलोकयेत् मूलेनप्रोक्ष्य तीर्थम

न्त्रेणप्रोक्षयेत् तीर्थमन्त्रावैदिकास्तांत्रिकाश्च ॐ अग्निःपशु

रासीत्तेनायजंतसएतल्लोकमजयद्यस्मिन्नग्निःसतेलोको

भविष्यति तंजेष्यसिपिवेतआपः १ वायुःपशुरासीत्तेना

शा॰ च॰ ३१ यं यजंति सप्त लोकमजयद्यस्मिन्वायुः सते लोको भविष्य
ति तं ते छसिपिवेत आपः २ सूर्यः पशुरासीत्तेनायजंत प
त लोकमजयद्यस्मिन्सूर्यः सते लोको भविष्यति तं ते छ
सिपिवेत आपः ३ वाचं ते शुंधामि प्राणं ते शुंधामि चक्षु
स्ते शुंधामि श्रोत्रं ते शुंधामि नाभिं ते शुंधामि मेढ्रं ते शुंधा
मि पायुं ते शुंधामि चरित्रांस्ते शुंधामि मनस्ते आप्यायतां
चक्षुस्ते आप्यायतां देवैस्त्वाज्जुष्टं निर्वपामि दिव्यस्त्वाज्जुष्टं

31

प्रोक्षयामि स्वाहा वाराही यमुना गंगा करतोया सरस्वती का
वेरी चंद्रभागा च सिंधुभैरवसागराः अत्रास्नाने समायांतु
ये चान्ये नद संज्ञिकाः पशुपाशविनाशाय हेमकूटस्थिताय
च परापराय परमेष्ठिने हुंकाराय च मूर्तये पश्चिमे त्र्यस्रवा
मे मंडलमालिखेत् चँडीघंरी यजेत्तत्र कुमारीं पूजयेत्ततः
तद्बलिं तत्र संस्थाप्य प्रोक्षयेत्साधकोत्तमः फें फें पशून्हन २
हूं हूं फट् २ तमभ्युक्षयेत् ततो रक्तमादाय मस्तके पशुं वंधयेत्

श्री. मेघाकारत्वंभमध्येपशुंवंधय २ सर्वांगसर्वावयवंपशुंवं
चं. धय २ ब्रह्मांडखंडमध्येपशुंवंधय २ ॐ ह्रीं फट् इति पशुंश्र
३२ द्धयापूजयेत् परमपशुरूपिणेनमः रुधिरवंधनायैनमः
32 शिरसि चंडिकायैनमः ललाटे सरस्वत्यै· मुखे चंद्रादित्या।
भ्यां नासिकायां बृहस्पतये· चक्षुषोः वैष्णव्यै· जिह्वायां प
वनाभायन· उदरे भैरव्यै· नाभौ रुधिरोन्मत्तायै· पादेषु न
तः कर्णौजपेत् किल २ वज्ररूपधरायै चंडदुर्गायै २ मंपशुस्व

गंनियोजय २ मुक्तिंप्रदर्शय २ ह्रींचंद्रमंडलाधिष्ठि
तविग्रहायैपशुरूपचंडिकायैपशुंप्रोक्षयामिस्वाहा
कुशाग्रतजलान्यादायोत्सृजेत् कृतांजलिःपठेत् या
र्थंपशवःसृष्टाःस्वयमेवस्वयंभुवा अतस्त्वांघातयि
ष्यामितस्माद्यज्ञेवधोवधः पशुरूपादितान्देवैर्यज्ञार्थे
चविधानतः इदानींत्वंमहात्माहिछेनयोसिनयापुनः
यज्ञोसित्वंपशुत्वेनयज्ञार्थंनिर्मितःपुरः अतःसर्वविधा

पू. नैनत्वांग्रीष्मजांकरोम्यहं पशुमेनंमयादत्तमपशुत्वेप्र
च. देहिमे देवताबलिदानेन मांसेन रुधिरेणच दातव्याप्र
११ ह्निनाम्ना यच्छागलायनमोनमः लोकानामुपकारार्थं
33 पशुःसृष्टोमयाधुना प्रोक्षितोभगवतीप्रीत्येममात्माने
वनारय भूपवज्रसृजा कृसंपिनाकपाणिंचकालरात्रिं।
स्वरूपकं उग्रनग्रास्यनयनंसर्वासुरभयंकरं रक्तांवरधरं
चैवपाशहस्तंकटुंबिनं पिबमानंचरुधिरंभुजानेकव्यसं

ह्रिंत इति ध्यात्वा पूजयेत् ॐ क्रें क्रें फट् वज्रेश्वरि खड्गरूपि।
णि तीक्ष्णधारेण पशुं संहर २ ॐ ह्रीं कालि २ वज्रेश्वरि लोह
दंडायै नमः इति संपूज्य असिर्विशसनः खड्गः तीक्ष्णधारो
दुरासदः श्रीगर्भो विजयश्चैव धर्मपाल नमोस्तु ते इति स्तुत्वा
अथ बंधमोचनं रक्षार्थं बंधनस्थोस्मि मुक्तये मोचितो मया
देव्याः प्रीतिं समुत्पाद्य स्वर्गं गच्छ द्विजोत्तम इति मोचयित्वा मूल
मंत्रं पठित्वा अथ वा परेण छेदयेत् ॐ ह्रीं श्रीं चौं चंडिकायै लोह

पू. ऐं ऊं यै ह्रीं ह्रीं २ मं पशुं महात्वमिमं महानंदकरु २ देहि २ गृ
चं. ह्ण २ स्वाहा २ मं बलिं मयादत्तं पशूनां च पशूत्तमं गृह्ण २
२४ महादेवि रक्तमांसुरितार्णवात् रुधिरं मस्तकं स्कंधं ततो
34 देव्यै निवेदयेत् घोरदंष्ट्रे करालास्ये सुरामांसप्रिये सदा
बलिं गृह्ण महादेवि पशुरक्तं समांसकं ॐ चंडिके चंडिका
यै कालकरूपपरिहृताये ह्रां ह्रां ह्रीं ह्रीं २ इदं पिशितरक्ता
न्नं गृह्ण २ स्वाहा ततो देवीं स्तुत्वा नत्वा स्थलहोमं वैश्वविह

रेत् इति मंत्ररत्नदीपिकायां नवार्णप्रातश्चंडीविधानं समा
प्तम् अनृणा अस्मिन्ननृणा परस्मिन्तृतीये लोके अनृणा।
स्याम ये देवयाना उत पितृयाना सर्वान्पथो अनृणा आक्षीये
म ॥

32